## ।। अथ सप्तत्रिंशोऽध्याय : ।। Chapter-37

अत्राश्चर्यममत् पूर्वं शृणु राजन् समाहित: ।।
चण्डीशालयमासाद्य तीर्थं पापप्रणाशनम् ।। १

कदाचिदत्र दुष्टाभूत् सारिका नाम राक्षसी ।।
निशाचर्या तया राजन् श्रीमालं समुपाद्रुतम् ।। २

पूर्वमार्गिरिसेविप्रै: सैन्धवारण्यवासिन: ।।
शप्ता ये ब्राह्मणा: कृष्णगतिमं प्रत्यसूयव: ।। ३

तैर्गत्वाराधित: सिन्धुरूपवासपरायणै: ।।
परितुष्टोथ पाथोधिस्तानुवाचेति यावत: ।। ४

तत: श्रीमालनाशाय प्रार्थिता तैर्निशाचरी ।।
सा द्विजानां सुतान् जातान् श्रेष्ठान् गर्भात्प्रगृह्य वै ।।५

दुष्टा प्रयाति पातालं ब्राह्मणा दु:खितास्तत: ।। ६

तया सहस्त्रश: कन्या गृहीता मनुजेश्वर ।।
कंगोल: पालयामास पाताले स्वसुता इव ।। ७

-०-

१ ई प्राप्तेये
२ बी श्रीमाल चैत्रनाशाय, ३ डी -ग्र-वै, ४ बी सा द्विजानां सुताजाता वैदिगर्भात् प्रगृह्वै
५ ए साध्य ६ ए समुपद्रुतम् ७ ए गृहिता

तत्याज बहुरत्नानि सौधानि[6] विविधानि च ।।
दुःखार्ता सारिका भीता प्रयाता गिरिमर्बुदम् ।। ८

[1]श्रीमालमभवच्छून्यमरण्यजनवर्जितम् ।।
सारिका शंकया कश्चित्तीर्थ[2]यात्रां न गच्छति ।। ९

शीर्णा निपेतुः प्रासादाः सौधानि प्रययुः क्षितिम्[3 (1)] ।।
मृगसिंहाकुलं जातं वराहमहिषावृतम् ।।
तोत्रं श्रीमालमुर्वीन्द्र[5] ध्वस्ततीर्थाश्रमद्रुमम् ।। १०

शून्यस्य तस्य कालोभूच्चतुःषष्ट्यधिकं शतम् ।। ११

लभन्ते न सुखं विप्रा न निद्रां च वितन्वते ।।
श्रीमालध्यायिनो नित्यं[7] विश्वसन्ति दिवानिशम् ।। १२

अथ प्रतापवान् राजा श्री पुञ्जो नाम विश्रुतः ।।
कदाचिदथ तत्रागादेकाकी मृगमन्वटन् ।। १३

स प्रविष्टः पुरं शून्यं भग्न[4]देवद्विजालयम् ।
देवतायतनालोकाद्दधच्चित्रं पदे पदे ।। १४

-o-

१- ई घ प्रतावितः पूर्वं श्रीमालिनोऽथ वणिजः श्री पुञ्ज पुरमास्थिता ।
गुर्जरास्तत्र राजेन्द्र प्राविशन्त गताश्चवै । प्राग्वटाथ तथोदीच्यां
पल्लस सन्निधौ ।।

२ ई बी तीर्थे

३ बी क्षितिम्

३ (१) ई ज्ञातिति

४ ई नगनदेव

५ ए मुवीन्द

६ ए सौधानी

७ ए नित्यां

मुनीनामाश्रमा रम्या: शाखाहस्ताग्रकोट्य: ।।
स्वयं शीर्णफला वृक्षा श्री पुञ्जेन महौजसा ।। १५

चिंतयामास मेधावी स्फीतमेतत्पुरोत्तमम्[1] ।
श्रीमालमितिविख्यातं पुराणं निर्मितं श्रिया ।। १६

कथं शून्यमिदं जातं नगरं देवनिर्मितम् ।।
कुतस्ते ब्राह्मणाश्रेष्ठा वर्त्तंते दु:खशीलिन: ।। १७

इत्थं चिंतयमानोऽसौ तृषार्त: पृथिवीपति: ।।
ब्राह्मीकुंड ददर्शाग्रे तृणागुल्मलतावृतम् ।। १८

स्वच्छं[3] सुगंधिराजीवपरागपरिवासितम् ।।
भृंगझंकारसंजुष्ट द्रुमच्छायासमावृतम् ।। १९

तं दृष्ट्वा नृपति: प्राज्ञो वारि पातुं[4] विवेश वै ।।
हृदोऽ[2]यमिति विज्ञाय पपौ राजा जलं शुचि ।। २०

विश्रम्य क्षणमाश्वस्त: पुरमागान्निजं पुन: ।।
रात्रौ सुखं प्रसुष्वाप श्री पुंजो रिपुमर्दन: ।। २१

-०-०-

१ ई सुरोत्तमं
२ ई सी डी * * हृदोत्थमिति

(ए ३) स्वच्छे
(ए ४) पीतुं

ब्राह्मे मुहूर्ते उत्थाय पूर्वाह्णिकं ततः ।।
बद्धांजलिपुटा राज्ञी सुप्रभा नाम सुव्रता ।। २२

इदमाह महीपालं प्रणायावरलक्षणा ।।
पूर्वे न्हि तव धर्मज्ञ कुत्रासमि मृगयारसः ।। २३

वने वा गिरिपार्श्वे वा तन्मे सर्वं समादिश ।।

राजोवाच :- कस्ते शुचिस्मिते हेतुः पश्नस्यास्य दिवामुखे ।। २४
किं वा ते मृगयाकार्यमशेषं वद वल्लभे ।।

राज्ञ्युवाच :- शृणु राजन् निजं वृत्तं यथैन कथितं पुरा ।। २५

पश्नस्य कारणं यच्च प्रसन्नं यदि ते मनः ।।
चिरात्प्रभृति भूपाल मुखाबे पतितं कृमिम् ।। २६

तांबूलमध्ये पश्यामि नित्यं नित्यं दिवामुखे ।।
तन्मयातव नाख्यातं वैमनस्यभयात् क्वचित् ।। २७

न तु सो च मया दृष्टस्तेन पृच्छामि हर्षिता ।।
किंचित् स्यात्पुष्पमाघ्राति पत्रं वापि हितं मुखे ।। २८

-०-०-

१ ई मुहूर्ते
२ ई बी मृगयासरः
४ घ ई वामे वामे वेति पाठः
श्लोक
५ ए तन्माया
२ ए कुत्रा

क्वचित्तीर्थबिु वा पीतं देव: कौ वाञ्छित: क्वचित् ।।
कारणं कृमिनाशस्य यत्ते राजन्वने भवत् ।। २६

तीर्थं वास्तु वनं वास्तु चित्ते तदवधारय ।।

वसिष्ठ उवाच :- इति प्राणधनेश्वर्या वच: श्रुत्वा ह्तिं नृप: ।। ३०

सस्मार सलिलं पीतं श्रीमालेऽथा ब्रवीत् प्रियाम् ।।
ब्राह्मणानामधिष्ठानं श्रीमालं नाम सुप्रभे ।। ३१

कंचित्तत्र ह्रदं प्राप्य पय: पीतं यथारुचि ।।
शून्येऽपि तत्र सश्रीका: शीर्णा: संति सहस्त्रश: ।। ३२

सुरालयाग्निशालाश्च वाप्य: कूपा: समंतत: ।।
एतत्ते कथितं राज्ञि मृगयापरिशीलिना ।। ३३

श्रीमाले यन्मया प्राप्य ह्रदे पीतं जलं शुचि ।।
राज्ञ्युवाच :- गम्यतें तत्र राजेंद्र श्रीमाले तीर्थसंकुले ।। ३४

ब्राह्मणा: पुनरानीय विवस्यन्तै स्ववेश्मसु ।।
तथेत्युक्त्वा नृपतिना श्रीपुंजेन महौजसा ।। ३५

-०-०-

१ बी कृत:

~~२ ई घ- कृत~~

१ ई क्वचित कृत?

अर्बुदे प्रेषिता दूता ब्राह्मणानां समीपत[1]: ।।

वसिष्ठ उवाच :- तेरुक्त्वा वचनं राज्ञः प्रश्रयावनतैर्नृप: ।। ३६

निवेदितं द्विजेंद्रेभ्यो हृदयानंदवर्द्धनम् ।।

दूता ऊचु: :- नमोऽस्तु[2] वो द्विजश्रेष्ठा: सर्वेभ्यो वेदवित्तमा: ।। ३७

आकारयति वो राजा श्रीपुंजो नाम विश्रुत: ।।

सेनापत्यमधिष्ठाय[3] पालयिष्यामि च: सदा ।। ३८

विमुंचत नैशानद्या: सारिकाया महद्भयम् ।।

इत्याकर्ण्य ततो वाक्यं दूतानामुत्सोर्मुम् ।। ३९

ब्राह्मणा गिरिमा मुंच्य श्रीमालं गतुक्ता[4]: ।।

राजाऽपि पूर्वमागत्य दर्शयामास तं ह्रदम् ।। ४०

श्रीमाले स्वप्रियां तत्र ब्राह्मी कुंडमिति श्रुतम्

तस्य दक्षिणदिग्भागे लिंग परमशोभनम् ।। ४१

दृष्ट्वा स्वभार्यया सार्द्धं विस्मितो भू[5]न् महीपति: ।।

पद्मानिपरितोधेन्वादुग्धंवबहुश: शृतम् ।। ४२

-०-०-

१ क ख सी डी ई समन्तत: घी-२-ई अर्बुदे प्रेषिता दूता: प्रेषिताश्चपकसै
२ बी ई वा, ३-घ-ई-२ सेनाधिपमधिष्ठाय ४ ई मुक्त:
५ बी ई दृष्ट्वाक्स भार्यया सार्द्धं विस्मत: स्परिच्छद:

विलोक्य सुप्रभा राज्ञी राजानमिदमब्रवीत् ।।
तीर्थमेतन् महाराज किंचित् पापभयापहम् ।। ४३

कुंडमेतन्ना संदेहो यतः पीतं पयस्त्वया ।।
वसिष्ठ उवाच :- सुप्रभायामितिवचः कथ्यंत्यां नृपं प्रति ।। ४४

राजन्नाकाशगामिनी वाणी श्रीपुंजमिदमब्रवीत्
तीर्थमेतन्न संदेहः श्रीपुंज भुवि विश्रुतम् ।। ४५

चंडीश इति नाम्न वै यत्र देवः स्वयं शिवः ।।
ब्राह्मीकुंडमिति ख्यातं यत्र ते जलपानतः ।। ४६

मुखादपगतः सर्वो रोगोऽयं कृमिसंभवः ।।
ब्राह्मीकुंडे[1] नराः स्नांति ये नरेंद्र समाहिताः ।। ४७

ते यांति शिवसालोक्यं नात्र कार्या विचारणा।।
वसिष्ठ उवाच :- इत्युक्त्वा भारती दिव्या विरराम नरेश्वर ।। ४८

राजाऽपि विस्मितमना तल्लिंगं विधिनार्चयत् ।।
प्रासादं कारयामास चंडीशस्य महोन्नतम् ।। ४९

-०-

१ बी हैं नरः

स्वर्णदंडसमाकीर्णां भास्वत्कलशभूषितम् ।।
देवानां च द्विजानां च हर्म्याणि शतशस्ततः ।। ५०

श्रीमाले शिल्पिभिर्दक्षैरुद्दधार स धार्मिकः ।।
रथ्या रथ्यांतरालाश्च प्रपारामम हादिकम् ।। ५१

आपणालयवीथीश्च श्रीपुंजो विदधे नवाः ।।
ततः प्राप्ता द्विजाः सर्वे हर्षपयविलोचनाः ।। ५२

विविशुर्निजवस्थानि समृत्याः पुनरेव च ।।
श्रीपुंजः स च राजेन्द्रं उषित्वा तत्र वै चिरम् ।। ५३

चंडीशस्य प्रसादेन शिवलोकं जगाम ह ।।
तेन शुश्रूषिता विप्राः सारिका च वशीकृता ।। ५४

श्रीमालामुम्दुतं[१] चंत्रप्रसादेनापिनाकिनः ।।
एतते कथितं राजन् श्रीपुंजाख्यानमुत्तमम् ।। ५५
श्रुत्वा यन्मानवो भक्त्या सर्वपापैः प्रमुच्यते ।। ५६

-0-

इति श्री स्कंदपुराणे श्रीमालमहात्म्ये श्रीपुंजो-
-पाख्यानं नाम सप्तत्रिंशो ऽध्याय ।। ३ ।।

१ ईं बी मुद्धतं